# Shri Shanaishcharakrita Nrisimha Ashtakam

# શ્રી શનૈશ્ચરકૃત નૃસિંહાષ્ટકમ્

## Document Information

Text title : Nrisimha Ashtakam 4

File name : nRRisiMhAShTakam4.itx

Category : vishhnu, aShTaka, dashAvatAra

Location : doc_vishhnu

Transliterated by : Yash Khasbage

Proofread by : Yash Khasbage, NA

Description/comments : Gangamahatmya

Latest update : August 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

Shri Shanaishcharakrita Nrisimha Ashtakam

# શ્રી શનૈશ્ચરકૃત નૃસિંહાષ્ટકમ્

શ્રી ગણેશાય નમઃ । શ્રી શનૈશ્ચરાય નમઃ ॥

શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।

શ્રીશનૈશ્ચરકૃત નૃસિંહાષ્ટક પ્રારમ્ભઃ ॥

ૐ યત્પાદપઙ્કજરજઃ પરમાદરેણ
    સંસેવિતં સકલકલ્મષરાશિનાશમ્ ।
કલ્યાણકારણમશેષનિજાનુગાનાં
    સત્ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૧॥

સર્વત્ર ચઞ્ચલતયા સ્થિતયાપિ લક્ષ્મ્યા
    બ્રહ્માદિવન્દ્યપદયા સ્થિરયાન્યસેવી ।
પાદારવિન્દયુગલં પરમાદરેણ
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૨॥

યદ્રૂપમાગમશિરઃ પ્રતિપાદ્યમાદ્ય-
    માધ્યાત્મિકાદિ પરિતાપહરં વિચિન્ત્યમ્ ।
યોગીશ્વરૈરપગતાખિલદોષસઙ્ઘૈઃ
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૩॥

પ્રહ્લાદભક્તવચસા હરિરાવિરાસીત્
    સ્તમ્ભેહિરણ્યકશિપુંય ઉદારભાવઃ ।
ઊર્વોનિધાય તદુદરો નખરૈર્દદાર
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૪॥

યોનૈજભક્ત મનલામ્બુધિભૂધરોગ્ર
    શ્રૂઙ્ગપ્રપાત વિષદન્તસરીસૃપેભ્યઃ ।
સર્વાત્મકઃ પરમકારુણિકોરક્ષ
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૫॥

યન્નિર્વિકાર પરરૂપવિચિન્તનેન
    યોગીશ્વરા વિષયાવીત સમસ્તરાગાઃ ।
વિશ્રાન્તિમાપુર વિનાશક્તી પરાખ્યાં
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૬॥

યદ્રૂપમુગ્રમરિમર્દનભાવશાલી
    સચ્ચિન્તનેન સકલાભવભીતિહારી ।
ભૂતજ્વરગ્રહસમુદ્ભવભીતિનાશમ્
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૭॥

યસ્યોત્તમં યશ ઉમાપતિમગ્રજન્મ
    શક્રાદિદૈવતસભાસુસમસ્તગીતમ્ ।
શ્રૂત્વૈક સર્વ શમલપ્રશમેકદક્ષં
    સત્ત્વં નૃસિંહ મયિ દેહિકૃપાવલોકમ્ ॥ ૮॥

શ્રીકૃષ્ણ ઉવાચ
એવં શ્રુત્વા સ્તુતિન્દેવઃ શનિના કલ્પિતા હરિઃ ।
ઉવાચ્યથં બ્રહ્મવૃન્દસ્ય શનિ સદ્ભક્તવત્સલઃ ॥

શ્રીનૃસિંહ ઉવાચ
પ્રસન્નોહં શને તુભ્યં વરં વરય શોભનમ્ ॥

શનિરુવાચ
નૃસિંહ ત્વં મયિ કૃપાં કુરુ દેવદયાનિધે ।
મદ્વાસરસ્તવપ્રીતિકરસ્યાદ્દેવતાપતે ॥

મત્કૃતં ત્વત્સ્તવં યેવૈ શ્રુણ્વતિ ચ પઠતિ ચ ।
સર્વાન્ કામાન્ પૂરયેથાં તેષાં ત્વં લોકભાવના ॥

શ્રીનૃસિંહ ઉવાચ
તથૈવાસ્તુ શનેઽહં વૈ રક્ષોભુવનમાસ્થિતઃ ।
ભક્તકામાન્ પૂરયિષ્યે ત્વ મમૈક વચશ્રુણુ ॥

ત્વત્કૃતં મત્પરં સ્તોત્રં યઃ પઠેત્ત શ્રુણોતિયઃ ॥

દ્વાદશાષ્ટમજન્મસ્થં ત્વદ્ભયં નાસ્તિ તસ્યવૈ ॥

ઇતિ શ્રી શનૈશ્ચરકૃત નૃસિંહાષ્ટકં સમ્પૂર્ણમ્ ।

શ્રીમદ્ભદ્ગામાહાત્મે રક્ષોભુવનપ્રસ્તાવે શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહસ્તુતિઃ
નવમોઽધ્યાયઃ ॥

શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહાર્પણમસ્તુ ॥

શ્રીકૃષ્ણાર્પણમસ્તુ ।

Encoded and proofread by Yash Khasbage

*Shri Shanaishcharakrita Nrisimha Ashtakam*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*